# ShrI ShivasahasranAma Stotram

# શ્રીશિવસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : shivasahasranAma

File name : shivasahasrarudrayAmala.itx

Category : sahasranAma, shiva, stotra, shivarahasya

Location : doc_shiva

Transliterated by : Ravi Chander r_ravi_c at hotmail.com

Proofread by : KS Ramachandran, Avinash Sathaye, Sivakumar Thyagarajan, DPD

Description-comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 1 | 33-188 and assorted for pUrva-uttarapIThikA ||

Latest update : December 23, 2007, March 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# શ્રીશિવસહસ્રનામસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ।
પૂર્વપીઠિકા -
ૐ ઓંકારનિલયં દેવં ગજવક્ત્રં ચતુર્ભુજમ્ ।
પિચણ્ડિલમહં વન્દે સર્વવિઘ્નોપશાન્તયે ॥ ૧॥ (સ્કન્દપુરાણં શઙ્કરસંહિતા શિવરહસ્ય ખણ્ડ)

શ્રુતિસ્મૃતિપુરાણાનામાલયં કરુણાલયમ્ ।
નમામિ ભગવત્પાદશઙ્કરં લોકશઙ્કરમ્ ॥ ૨॥

શઙ્કરં શઙ્કરાચાર્યં કેશવં બાદરાયણમ્ ।
સૂત્રભાષ્યકૃતૌ વન્દે ભગવન્તૌ પુનઃપુનઃ ॥ ૩॥ (તોટકાષ્ટકમ્)

વન્દે શમ્ભુમુમાપતિં સુરગુરું વન્દે જગત્કારણં
વન્દે પન્નગભૂષણં મૃગધરં વન્દે પશૂનામ્પતિમ્ ।
વન્દે સૂર્યશશાઙ્કવહ્નિનયનં વન્દે મુકુન્દપ્રિયં
વન્દે ભક્તજનાશ્રયં ચ વરદં વન્દે શિવં શઙ્કરમ્ ॥ ૪॥

તવ તત્ત્વં ન જાનામિ કીદૃશોઽસિ મહેશ્વર ।
યાદૃશોઽસિ મહાદેવ તાદૃશાય નમો નમઃ ॥ ૫॥ (શિવમહિમ્નસ્તોત્રમ્)

ઋષય ઊચુઃ-
સૂત વેદાર્થતત્ત્વજ્ઞ શિવધ્યાનપરાયણ ।
મુક્ત્યુપાયં વદાસ્મભ્યં કૃપાલો મુનિસત્તમ ॥ ૧॥ (શિવરહસ્ય ૭.૧.૧-૬.૧)

કઃ સેવ્યઃ સર્વદેવેષુ કો વા જપ્યો મનુઃ સદા ।
સ્થાતવ્યં કુત્ર વા નિત્યં કિં વા સર્વાર્થસાધકમ્ ॥ ૨॥

શ્રીસૂત ઉવાચ-
ધન્યાન્મન્યામહે નૂનમનન્યશરણાન્મુનીન્ ।
વન્યાશિનો વનેવાસાન્ ન્યસ્તમાનુષ્યકલ્મષાન્ ॥ ૩॥

ભવદ્ભિઃ સર્વવેદાર્થતત્ત્વં જ્ઞાતમતન્દ્રિતૈઃ ।

ભવદ્ભિઃ સર્વવેદાર્થો જ્ઞાત એવાસ્તિ યદ્યપિ ॥ ૪॥

તથાપિ કિઞ્ચિદ્વક્ષ્યામિ યથા જ્ઞાતં મયા તથા ।
પુરા કૈલાસશિખરે સુખાસીનં જગત્પ્રભુમ્ ॥ ૫॥

વેદાન્તવેદ્યમીશાનં શઙ્કરં લોકશઙ્કરમ્ । (શિવરહસ્ય ૭.૧.૬.૧)
વિલોક્યાતીવ સન્તુષ્ટઃ ષણ્મુખઃ સામ્બમીશ્વરમ્ ॥ ૬॥ (શિવરહસ્ય ૭.૧.૧૩-૧૭)

મત્વા કૃતાર્થમાત્માનં પ્રણિપત્ય સદાશિવમ્ ।
પપ્રચ્છ સર્વલોકાનાં મુક્ત્યુપાયં કૃતાઞ્જલિઃ ॥ ૭॥

શ્રીસ્કન્દ ઉવાચ-
વિશ્વેશ્વર મહાદેવ વિષ્ણુબ્રહ્માદિવન્દિત ।
દેવાનાં માનવાનાં ચ કિં મોક્ષસ્યાસ્તિ સાધનમ્ ॥ ૮॥

તવ નામાન્યનન્તાનિ સન્તિ યદ્યપિ શઙ્કર ।
તથાપિ તાનિ દિવ્યાનિ ન જ્ઞાયન્તે મયાધુના ॥ ૯॥

પ્રિયાણિ શિવનામાનિ સર્વાણિ શિવ યદ્યપિ ।
તથાપિ કાનિ રમ્યાણિ તેષુ પ્રિયતમાનિ તે ॥

તાનિ સર્વાર્થદાન્યદ્ય કૃપયા વક્તુમર્હસિ ॥ ૧૦॥ (શિવરહસ્ય ૭.૧.૧૭)

શ્રીસૂત ઉવાચ-
કુમારોદીરિતાં વાચં સર્વલોકહિતાવહામ્ ।
શ્રુત્વા પ્રસન્નવદનસ્તમુવાચ સદાશિવઃ ॥ ૧૧॥ (શિવરહસ્ય ૭.૧.૩૨-૪૬)
શ્રીસદાશિવ ઉવાચ-
સાધુ સાધુ મહાપ્રાજ્ઞ સમ્યક્પૃષ્ટં ત્વયાધુના ।
યદિદાનીં ત્વયા પૃષ્ટં તદ્વક્ષ્યે શૃણુ સાદરમ્ ॥ ૧૨॥

એવમેવ પુરા ગૌર્યા પૃષ્ટઃ કાશ્યામહં તદા ।
સમાખ્યાતં મયા સમ્યક્સર્વેષાં મોક્ષસાધનમ્ ॥ ૧૩॥

દિવ્યાન્યનન્તનામાનિ સન્તિ તન્મધ્યગં પરમ્ ।
અષ્ટોત્તરસહસ્રં તુ નામ્નાં પ્રિયતરં મમ ॥ ૧૪॥

એકૈકમેવ તન્મધ્યે નામ સર્વાર્થસાધકમ્ ।
મયાપિ નામ્નાં સર્વેષાં ફલં વક્તું ન શક્યતે ॥ ૧૫॥

તિલાક્ષતૈર્બિલ્વપત્રૈઃ કમલૈઃ કોમલૈર્નવૈઃ ।

પૂજયિષ્યતિ માં ભક્ત્યા યસ્ત્વેતન્નામસઙ્ખ્યયા ॥ ૧૬॥

સ પાપેભ્યઃ સંસૃતેશ્ચ મુચ્યતે નાત્ર સંશયઃ ।
તતો મમાન્તિકં યાતિ પુનરાવૃત્તિદુર્લભમ્ ॥ ૧૭॥

એકૈકેનૈવ નામ્ના મામર્ચયિત્વા દૃઢવ્રતાઃ ।
સ્વેષ્ટં ફલં પ્રાપ્નુવન્તિ સત્યમેવોચ્યતે મયા ॥ ૧૮॥

એતન્નામાવલીં યસ્તુ પઠન્માં પ્રણમેત્સદા ।
સ યાતિ મમ સાયુજ્યં સ્વેષ્ટં બન્ધુસમન્વિતઃ ॥ ૧૯॥

સ્પૃષ્ટ્વા મલ્લિઙ્ગમમલમેતન્નામાનિ યઃ પઠેત્ । (માં લિઙ્ગ)
સ પાતકેભ્યઃ સર્વેભ્યઃ સત્યમેવ પ્રમુચ્યતે ॥ ૨૦॥

યસ્ત્વેતન્નામભિઃ સમ્યક્ ત્રિકાલં વત્સરાવધિ ।
મામર્ચયતિ નિર્દમ્ભઃ સ દેવેન્દ્રો ભવિષ્યતિ ॥ ૨૧॥

એતન્નામાનુસન્ધાનનિરતઃ સર્વદામુના ।
મમ પ્રિયકરસ્તસ્માન્નિવસામ્યત્ર સાદરમ્ ॥ ૨૨॥

તત્પૂજયા પૂજિતોઽહં સ એવાહં મતો મમ ।
તસ્માત્પ્રિયતરં સ્થાનમન્યન્નૈવ હિ દૃશ્યતે ॥ ૨૩॥

હિરણ્યબાહુરિત્યાદિનામ્નાં શમ્ભુરહં ઋષિઃ ।
દેવતાપ્યહમેવાત્ર શક્તિર્ગૌરી મમ પ્રિયા ॥ ૨૪॥

મહેશ એવ સંસેવ્યઃ સર્વૈરિતિ હિ કીલકમ્ ।
ધર્માદ્યર્થાઃ ફલં જ્ઞેયં ફલદાયી સદાશિવઃ ॥ ૨૫॥ (શિવરહસ્ય ૭.૧.૪૬)

ૐ
સૌરમણ્ડલમધ્યસ્થં સામ્બં સંસારભેષજમ્ ।
નીલગ્રીવં વિરૂપાક્ષં નમામિ શિવમવ્યયમ્ ॥

॥ ન્યાસઃ ॥

ૐ અસ્ય શ્રીશિવસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય શમ્ભુરૃષિઃ ।
અનુષ્ટુપ્ છન્દઃ । પરમાત્મા શ્રીસદાશિવો દેવતા ।
મહેશ્વર ઇતિ બીજમ્ । ગૌરી શક્તિઃ ।
મહેશ એવ સંસેવ્યઃ સર્વૈરિતિ કીલકમ્ ।
શ્રીસામ્બસદાશિવ પ્રીત્યર્થે મુખ્યસહસ્રનામજપે વિનિયોગઃ ।

॥ ધ્યાનમ્ ॥

શાન્તં પદ્માસનસ્થં શશિધરમકુટં પઞ્ચવક્ત્રં ત્રિનેત્રં
શૂલં વજ્રં ચ ખડ્ગં પરશુમભયદં દક્ષભાગે વહન્તમ્ ।
નાગં પાશં ચ ઘણ્ટાં વરડમરુયુતં ચાઙ્કુશં વામભાગે
નાનાલઙ્કારયુક્તં સ્ફટિકમણિનિભં પાર્વતીશં નમામિ ॥

ૐ નમો ભગવતે રુદ્રાય ।
ૐ હિરણ્યબાહુઃ સેનાનીર્દિક્પતિસ્તરુરાટ્ હરઃ ।
હરિકેશઃ પશુપતિર્મહાન્ સસ્પિઞ્જરો મૃડઃ ॥ ૧॥ (શિવરહસ્ય ૭.૧.૪૭)

વિવ્યાધી બભ્લુશઃ શ્રેષ્ઠઃ પરમાત્મા સનાતનઃ ।
સર્વાન્નરાટ્ જગત્કર્તા પુષ્ટેશો નન્દિકેશ્વરઃ ॥ ૨॥

આતતાવી મહારુદ્રઃ સંસારાસ્ત્રઃ સુરેશ્વરઃ ।
ઉપવીતિરહન્ત્યાત્મા ક્ષેત્રેશો વનનાયકઃ ॥ ૩॥

રોહિતઃ સ્થપતિઃ સૂતો વાણિજો મન્ત્રિરુન્નતઃ । (સૂતો વાગીશો)
વૃક્ષેશો હુતભુગ્દેવો ભુવન્તિર્વારિવસ્કૃતઃ ॥ ૪॥

ઉચ્ચૈર્ઘોષો ઘોરરૂપઃ પત્તીશઃ પાશમોચકઃ ।
ઓષધીશઃ પઞ્ચવક્ત્રઃ કૃત્સ્નવીતો ભયાનકઃ ॥ ૫॥

સહમાનઃ સ્વર્ણરેતાઃ નિવ્યાધિર્નિરુપપ્લવઃ । (વિવ્યાધિ)
આવ્યાધિનીશઃ કકુભો નિષઙ્ગી સ્તેનરક્ષકઃ ॥ ૬॥ (અવ્યાધિ)

મન્ત્રાત્મા તસ્કરાધ્યક્ષો વઞ્ચકઃ પરિવઞ્ચકઃ ।
અરણ્યેશઃ પરિચરો નિચેરુઃ સ્તાયુરક્ષકઃ ॥ ૭॥

પ્રકૃન્તેશો ગિરિચરઃ કુલુઞ્ચેશો ગુહેષ્ટદઃ । (પ્રકૃતીશ્, કુલિઞ્ચેશો, ગ્રહેષ્ટકઃ)
ભવઃ શર્વો નીલકણ્ઠઃ કપર્દી ત્રિપુરાન્તકઃ ॥ ૮॥

વ્યુપ્તકેશો ગિરિશયઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
શિપિવિષ્ટશ્ચન્દ્રમૌલિર્હ્રસ્વો મીઢુષ્ટમોઽનઘઃ ॥ ૯॥

વામનો વ્યાપકઃ શૂલી વર્ષીયાનજડોઽનણુઃ ।
ઊર્વ્યઃ સૂર્મ્યોઽગ્રિયઃ શીભ્યઃ પ્રથમઃ પાવકાકૃતિઃ ॥ ૧૦॥ (ઊર્મ્યઃ, સૂર્મ્યપ્રિયઃ)

આચારસ્તારકસ્તારોઽવસ્વન્યોઽનન્તવિગ્રહઃ । (કુચેરસ્તારકસ્તારો)
દ્વીપ્યઃ સ્રોતસ્ય ઈશાનો ધુર્યો ગવ્યયનો યમઃ ॥ ૧૧॥ (દીપ્યઃ)

પૂર્વજોઽપરજો જ્યેષ્ઠઃ કનિષ્ઠો વિશ્વલોચનઃ ।
અપગલ્ભો મધ્યમોર્મ્યો જઘન્યો બુધ્નિયઃ પ્રભુઃ ॥ ૧૨॥ (અપગલ્ભ્યો મધ્યમૌર્વ્યો જઘન્યો)

પ્રતિસર્યોઽનન્તરૂપઃ સોભ્યો યામ્યો સુરાશ્રયઃ । (પ્રતિસૂર્યો)
ખલ્યોર્વર્યોઽભયઃ ક્ષેમ્યઃ શ્લોક્યઃ પથ્યો નભોઽગ્રણીઃ ॥ ૧૩॥ (ખલ્યોર્વર્યો ભવચ્છેદ્યઃ)

વન્યોઽવસાન્યઃ પૂતાત્મા શ્રવઃ કક્ષ્યઃ પ્રતિશ્રવઃ ।
આશુષેણો મહાસેનો મહાવીરો મહારથઃ ॥ ૧૪॥

શૂરોઽતિઘાતકો વર્મી વરૂથી બિલ્મિરુદ્યતઃ ।
શ્રુતસેનઃ શ્રુતઃ સાક્ષી કવચી વશકૃદ્વશી ॥ ૧૫॥ (વશકૃધ્વશી)

આહનન્યોઽનન્યનાથો દુન્દુભ્યોઽરિષ્ટનાશકઃ ।
ધૃષ્ણુઃ પ્રમૃશ ઇત્યાત્મા વદાન્યો વેદસમ્મતઃ ॥ ૧૬॥ (શ઼ૃષ્ણુઃ)

તીક્ષ્ણેષુપાણિઃ પ્રહિતઃ સ્વાયુધઃ શસ્ત્રવિત્તમઃ । (શાસ્ત્રવિત્તમઃ)
સુધન્વા સુપ્રસન્નાત્મા વિશ્વવક્ત્રઃ સદાગતિઃ ॥ ૧૭॥

સ્રુત્યઃ પથ્યો વિશ્વબાહુઃ કાટ્યો નીપ્યો શુચિસ્મિતઃ । (સ્તુત્યઃ)
સૂદ્યઃ સરસ્યો વૈશન્તો નાદ્યઃ કૂપ્યો ઋષિર્મનુઃ ॥ ૧૮॥

સર્વો વર્ષ્યો વર્ષરૂપઃ કુમારઃ કુશલોઽમલઃ ।
મેઘ્યોઽવર્ષ્યોઽમોઘશક્તિઃ વિદ્યુત્યોઽમોઘવિક્રમઃ ॥ ૧૯॥

દુરાસદો દુરારાધ્યો નિર્દ્વન્દ્વો દુઃસહર્ષભઃ ।
ઇધ્રિયઃ ક્રોધશમનો જાતુકર્ણઃ પુરુષ્ટુતઃ ॥ ૨૦॥

આતપ્યો વાયુરજરો વાત્યઃ કાત્યાયનીપ્રિયઃ ।
વાસ્તવ્યો વાસ્તુપો રેષ્મ્યો વિશ્વમૂર્ધા વસુપ્રદઃ ॥ ૨૧॥ (રેણ્યો)

સોમસ્તામ્રોઽરુણઃ શઙ્ગઃ રુદ્રઃ સુખકરઃ સુકૃત્ । (સોમસ્તામ્રોઅરુણો શમ્ભૂ)
ઉગ્રોઽનુગ્રો ભીમકર્મા ભીમો ભીમપરાક્રમઃ ॥ ૨૨॥

અગ્રેવધો હનીયાત્મા હન્તા દૂરેવધો વધઃ ।
શમ્ભુર્મયોભવો નિત્યઃ શઙ્કરઃ કીર્તિસાગરઃ ॥ ૨૩॥ (મયોભુવો)

મયસ્કરઃ શિવતરઃ ખણ્ડપર્શુરજઃ શુચિઃ ।
તીર્થ્યઃ કૂલ્યોઽમૃતાધીશઃ પાર્યોઽવાર્યોઽમૃતાકરઃ ॥ ૨૪॥ (તીર્થઃ)

શુદ્ધઃ પ્રતરણો મુખ્યઃ શુદ્ધપાણિરલોલુપઃ । (શૂલપાણિરલોલુપઃ)
ઉચ્ચ ઉત્તરણસ્તાર્યસ્તાર્યજ્ઞસ્તાર્યહૃદ્ગતિઃ ॥ ૨૫॥ (ઉત્તરણસ્તાર્યસ્તારજ્ઞસ્તાર્યદૂરગઃ)

આતાર્યઃ સારભૂતાત્મા સારગ્રાહી દુરત્યયઃ ।
આલાદ્યો મોક્ષદઃ પથ્યોઽનર્થહા સત્યસઙ્ગરઃ ॥ ૨૬॥

શષ્પ્યઃ ફેન્યઃ પ્રવાહ્યોઢા સિકત્યઃ સૈકતાશ્રયઃ । (શષ્પઃ)
ઇરિણ્યો ગ્રામણીઃ પુણ્યઃ શરણ્યઃ શુદ્ધશાસનઃ ॥ ૨૭॥ (ગ્રામણિઃ)

વરેણ્યો યજ્ઞપુરુષો યજ્ઞેશો યજ્ઞનાયકઃ । (વરેણ્યો યજ્ઞરૂપશ્ચ)
યજ્ઞકર્તા યજ્ઞભોક્તા યજ્ઞવિઘ્નવિનાશકઃ ॥ ૨૮॥

યજ્ઞકર્મફલાધ્યક્ષો યજ્ઞમૂર્તિરનાતુરઃ ।
પ્રપથ્યઃ કિંશિલો ગેહ્યો ગૃહ્યસ્તલ્પ્યો ધનાકરઃ ॥ ૨૯॥ (કિંશુકો મેઘ્યો / મેધ્યો)
પુલસ્ત્યઃ ક્ષયણો ગોષ્ઠ્યો ગોવિન્દો ગીતસત્ક્રિયઃ । (ક્ષણયો ગેહ્યો)
હૃદય્યો હૃદ્યકૃત્ હૃદ્યો ગહ્વરેષ્ઠઃ પ્રભાકરઃ ॥ ૩૦॥ (હૃદદ્યો)

નિવેષ્પ્યો નિયતોઽયન્તા પાંસવ્યઃ સમ્પ્રતાપનઃ । (નિવેષ્ટ્યો, પાઁસત્યઃ)
શુષ્ક્યો હરિત્યોઽપૂતાત્મા રજસ્યઃ સાત્વિકપ્રિયઃ ॥ ૩૧॥ (હરિત્યઃ પૂતાત્મા)

લોપ્યોલપ્યઃ પર્ણશદ્યઃ પર્ણ્યઃ પૂર્ણઃ પુરાતનઃ । (પર્ણપૂર્ણઃ)
ભૂતો ભૂતપતિર્ભૂપો ભૂધરો ભૂધરાયુધઃ ॥ ૩૨॥ (ભૂતપતિર્ભૂયો)

ભૂતસઙ્ઘો ભૂતમૂર્તિર્ભૂતહા ભૂતિભૂષણઃ । (ભૂતિહા / ભૂતિદો)
મદનો માદકો માદ્યો મદહા મધુરપ્રિયઃ ॥ ૩૩॥

મધુર્મધુકરઃ ક્રૂરો મધુરો મદનાન્તકઃ । (મદનો મદનાન્તકઃ)
નિરઞ્જનો નિરાધારો નિર્લુપ્તો નિરુપાધિકઃ ॥ ૩૪॥

નિષ્પ્રપઞ્ચો નિરાકારો નિરીહો નિરુપદ્રવઃ ।
સત્ત્વઃ સત્ત્વગુણોપેતઃ સત્ત્વવિત્ સત્ત્વવિત્પ્રિયઃ ॥ ૩૫॥

સત્ત્વનિષ્ઠઃ સત્ત્વમૂર્તિઃ સત્ત્વેશઃ સત્ત્વવિત્તમઃ ।
સમસ્તજગદાધારઃ સમસ્તગુણસાગરઃ ॥ ૩૬॥

સમસ્તદુઃખવિધ્વંસી સમસ્તાનન્દકારણઃ ।
રુદ્રાક્ષમાલાભરણો રુદ્રાક્ષપ્રિયવત્સલઃ ॥ ૩૭॥

રુદ્રાક્ષવક્ષા રુદ્રાક્ષરૂપો રુદ્રાક્ષપક્ષકઃ । (રુદ્રાક્ષભક્ષકઃ)
વિશ્વેશ્વરો વીરભદ્રઃ સમ્રાટ્ દક્ષમખાન્તકઃ ॥ ૩૮॥

વિઘ્નેશ્વરો વિઘ્નકર્તા ગુરુર્દેવશિખામણિઃ ।

ભુજગેન્દ્રલસત્કણ્ઠો ભુજઙ્ગાભરણપ્રિયઃ ॥ ૩૯॥

ભુજઙ્ગવિલસત્કર્ણો ભુજઙ્ગવલયાવૃતઃ ।
મુનિવન્દ્યો મુનિશ્રેષ્ઠો મુનિવૃન્દનિષેવિતઃ ॥ ૪૦॥

મુનિહૃત્પુણ્ડરીકસ્થો મુનિસઙ્ઘૈકજીવનઃ ।
મુનિમૃગ્યો વેદમૃગ્યો મૃગહસ્તો મુનીશ્વરઃ ॥ ૪૧॥

મૃગેન્દ્રચર્મવસનો નરસિંહનિપાતનઃ ।
મૃત્યુઞ્જયો મૃત્યુમૃત્યુરપમૃત્યુવિનાશકઃ ॥ ૪૨॥

દુષ્ટમૃત્યુરદુષ્ટેષ્ટઃ મૃત્યુહા મૃત્યુપૂજિતઃ ।
ઊર્ધ્વો હિરણ્યઃ પરમો નિધનેશો ધનાધિપઃ ॥ ૪૩॥ (ઉર્વ્યો)

યજુર્મૂર્તિઃ સામમૂર્તિઃ ઋઙ્મૂર્તિર્મૂર્તિવર્જિતઃ ।
વ્યક્તો વ્યક્તતમોઽવ્યક્તો વ્યક્તાવ્યક્તસ્તમો જવી ॥ ૪૪॥

લિઙ્ગમૂર્તિરલિઙ્ગાત્મા લિઙ્ગાલિઙ્ગાત્મવિગ્રહઃ ।
ગ્રહગ્રહો ગ્રહાધારો ગ્રહાકારો ગ્રહેશ્વરઃ ॥ ૪૫॥ (ગ્રહોઽગ્રહો)

ગ્રહકૃદ્ ગ્રહભિદ્ ગ્રાહી ગ્રહો ગ્રહવિલક્ષણઃ ।
કલ્પાકારઃ કલ્પકર્તા કલ્પલક્ષણતત્પરઃ ॥ ૪૬॥

કલ્પો કલ્પાકૃતિઃ કલ્પનાશકઃ કલ્પકલ્પકઃ ।
પરમાત્મા પ્રધાનાત્મા પ્રધાનપુરુષઃ શિવઃ ॥ ૪૭॥

વેદ્યો વૈદ્યો વેદવેદ્યો વેદવેદાન્તસંસ્તુતઃ ।
વેદવક્ત્રો વેદજિહ્વો વિજિહ્વો જિહ્મનાશકઃ ॥ ૪૮॥

કલ્યાણરૂપઃ કલ્યાણઃ કલ્યાણગુણસંશ્રયઃ ।
ભક્તકલ્યાણદો ભક્તકામધેનુઃ સુરાધિપઃ ॥ ૪૯॥

પાવનઃ પાવકો વામો મહાકાલો મદાપહઃ ।
ઘોરપાતકદાવાગ્નિર્દવભસ્મકણપ્રિયઃ ॥ ૫૦॥

અનન્તસોમસૂર્યાગ્નિમણ્ડલપ્રતિમપ્રભઃ ।
જગદેકપ્રભુઃસ્વામી જગદ્વન્દ્યો જગન્મયઃ ॥ ૫૧॥

જગદાનન્દદો જન્મજરામરણવર્જિતઃ ।
ખટ્વાઙ્ગી નીતિમાન્ સત્યો દેવતાત્માઽઽત્મસમ્ભવઃ ॥ ૫૨॥ (સદ્યો)
કપાલમાલાભરણઃ કપાલી વિષ્ણુવલ્લભઃ ।

કમલાસનકાલાગ્નિઃ કમલાસનપૂજિતઃ ॥ ૫૩ ॥

કાલાધીશસ્ત્રિકાલજ્ઞો દુષ્ટવિગ્રહવારકઃ ।
નાટ્યકર્તા નટપરો મહાનાટ્યવિશારદઃ ॥ ૫૪ ॥

વિરાડ્રૂપધરો ધીરો વીરો વૃષભવાહનઃ ।
વૃષાઙ્કો વૃષભાધીશો વૃષાત્મા વૃષભધ્વજઃ ॥ ૫૫ ॥ (વૃષભાવીશો)
મહોન્નતો મહાકાયો મહાવક્ષા મહાભુજઃ । (મહાવક્ષ્યો મહાવીરો મહાભુજઃ)
મહાસ્કન્ધો મહાગ્રીવો મહાવક્ત્રો મહાશિરાઃ ॥ ૫૬ ॥ (મહાવક્ત્રો મહચ્છરઃ)

મહાહનુર્મહાદંષ્ટ્રો મહદોષ્ઠો મહોદરઃ ।
સુન્દરભ્રૂઃ સુનયનઃ સુલલાટઃ સુકન્દરઃ ॥ ૫૭ ॥

સત્યવાક્યો ધર્મવેત્તા સત્યજ્ઞઃ સત્યવિત્તમઃ ।
ધર્મવાન્ ધર્મનિપુણો ધર્મો ધર્મપ્રવર્તકઃ ॥ ૫૮ ॥

કૃતજ્ઞઃ કૃતકૃત્યાત્મા કૃતકૃત્યઃ કૃતાગમઃ ।
કૃત્યવિત્ કૃત્યવિચ્છ્રેષ્ઠઃ કૃતજ્ઞપ્રિયકૃત્તમઃ ॥ ૫૯ ॥

વ્રતકૃદ્ વ્રતવિચ્છ્રેષ્ઠો વ્રતવિદ્વાન્ મહાવ્રતી ।
વ્રતપ્રિયો વ્રતાધારો વ્રતાકારો વ્રતેશ્વરઃ ॥ ૬૦ ॥

અતિરાગી વીતરાગી રાગહેતુર્વિરાગવિત્ ।
રાગઘ્નો રાગશમનો રાગદો રાગિરાગવિત્ ॥ ૬૧ ॥

વિદ્વાન્ વિદ્વત્તમો વિદ્વજ્જનમાનસસંશ્રયઃ ।
વિદ્વજ્જનાશ્રયો વિદ્વજ્જનસ્તવ્યપરાક્રમઃ ॥ ૬૨ ॥

નીતિકૃન્નીતિવિન્નીતિપ્રદાતા નીતિવિત્પ્રિયઃ ।
વિનીતવત્સલો નીતિસ્વરૂપો નીતિસંશ્રયઃ ॥ ૬૩ ॥

ક્રોધવિત્ ક્રોધકૃત્ ક્રોધિજનકૃત્ ક્રોધરૂપધૃક્ ।
(ક્રોધજિત્ ક્રોધિલઃ / ક્રોધનઃ ક્રોધિજનવિત્ક્રોધરૂપધૃક્)
સક્રોધઃ ક્રોધહા ક્રોધિજનહા ક્રોધકારણઃ ॥ ૬૪ ॥ (ક્રોધદઃ ક્રોધહા)

ગુણવાન્ ગુણવિચ્છ્રેષ્ઠો નિર્ગુણો ગુણવિત્પ્રિયઃ । (ગુણવત્પ્રિયઃ)
ગુણાધારો ગુણાકારો ગુણકૃદ્ગુણનાશકઃ ॥ ૬૫ ॥

વીર્યવાન્ વીર્યવિચ્છ્રેષ્ઠો વીર્યવિદ્વીર્યસંશ્રયઃ । (વીર્યકશ્રેષ્ઠો)
વીર્યાકારો વીર્યકરો વીર્યહા વીર્યવર્ધકઃ ॥ ૬૬ ॥

કાલવિત્કાલકૃત્કાલો બલકૃદ્ બલવિદ્બલી ।
મનોન્મનો મનોરૂપો બલપ્રમથનો બલઃ ॥ ૬૭॥

વિશ્વપ્રદાતા વિશ્વેશો વિશ્વમાત્રૈકસંશ્રયઃ ।
વિશ્વકારો મહાવિશ્વો વિશ્વવિશ્વો વિશારદઃ ॥ ૬૮॥

variation
વિદ્યાપ્રદાતા વિદ્યેશો વિદ્યામાત્રૈકસંશ્રયઃ ।
વિદ્યાકારો મહાવિદ્યો વિદ્યાવિદ્યો વિશારદઃ ॥૬૮॥

વસન્તકૃદ્વસન્તાત્મા વસન્તેશો વસન્તદઃ ।
ગ્રીષ્માત્મા ગ્રીષ્મકૃદ્ ગ્રીષ્મવર્ધકો ગ્રીષ્મનાશકઃ ॥ ૬૯॥

પ્રાવૃટ્કૃત્ પ્રાવૃડાકારઃ પ્રાવૃટ્કાલપ્રવર્તકઃ ।
પ્રાવૃટ્પ્રવર્ધકઃ પ્રાવૃણ્ણાથઃ પ્રાવૃડ્વિનાશકઃ ॥ ૭૦॥

શરદાત્મા શરદ્ધેતુઃ શરત્કાલપ્રવર્તકઃ ।
શરન્નાથઃ શરત્કાલનાશકઃ શરદાશ્રયઃ ॥ ૭૧॥

હિમસ્વરૂપો હિમદો હિમહા હિમનાયકઃ ।
શૈશિરાત્મા શૈશિરેશઃ શૈશિરર્તુપ્રવર્તકઃ ॥ ૭૨॥

પ્રાચ્યાત્મા દક્ષિણાકારઃ પ્રતીચ્યાત્મોત્તરાકૃતિઃ ।
આગ્નેયાત્મા નિરૃતીશો વાયવ્યાત્મેશનાયકઃ ॥ ૭૩॥

ઊર્ધ્વાધઃસુદિગાકારો નાનાદેશૈકનાયકઃ । (ઊર્ધ્વાદન્યદિગાકારો)
સર્વપક્ષિમૃગાકારઃ સર્વપક્ષિમૃગાધિપઃ ॥ ૭૪॥

સર્વપક્ષિમૃગાધારો મૃગાદ્યુત્પત્તિકારણઃ ।
જીવાધ્યક્ષો જીવવન્દ્યો જીવવિજ્જીવરક્ષકઃ ॥ ૭૫॥ (જીવબન્ધ્યો / જીવબન્ધુઃ)

જીવકૃજ્જીવહા જીવજીવનો જીવસંશ્રયઃ ।
જ્યોતિઃસ્વરૂપો વિશ્વાત્મા વિશ્વનાથો વિયત્પતિઃ ॥ ૭૬॥

વજ્રાત્મા વજ્રહસ્તાત્મા વજ્રેશો વજ્રભૂષિતઃ । (વજ્રશો)
કુમારગુરુરીશાનો ગણાધ્યક્ષો ગણાધિપઃ ॥ ૭૭॥

પિનાકપાણિઃ સૂર્યાત્મા સોમસૂર્યાગ્નિલોચનઃ ।
અપાયરહિતઃ શાન્તો દાન્તો દમયિતા દમઃ ॥ ૭૮॥

ઋષિઃ પુરાણપુરુષઃ પુરુષેશઃ પુરન્દરઃ ।

કાલાગ્નિરુદ્રઃ સર્વેશઃ શમરૂપઃ શમેશ્વરઃ ॥ ૭૯॥

પ્રલયાનલકૃદ્ દિવ્યઃ પ્રલયાનલનાશકઃ ।
ત્રિયમ્બકોઽરિષડ્વર્ગનાશકો ધનદપ્રિયઃ ॥ ૮૦॥

અક્ષોભ્યઃ ક્ષોભરહિતઃ ક્ષોભદઃ ક્ષોભનાશકઃ ।
સદમ્ભો દમ્ભરહિતો દમ્ભદો દમ્ભનાશકઃ ॥ ૮૧॥ (દમ્ભો દમ્ભવિનાશકઃ)

કુન્દેન્દુશઙ્ખધવલો ભસ્મોદ્ધૂલિતવિગ્રહઃ ।
ભસ્મધારણહૃષ્ટાત્મા તુષ્ટિઃ પુષ્ટ્યરિસૂદનઃ ॥ ૮૨॥ (પુષ્ટોઽરિસૂદનઃ)

સ્થાણુર્દિગમ્બરો ભર્ગો ભગનેત્રભિદુદ્યમઃ । (દોદ્યમઃ)
ત્રિકાગ્નિઃ કાલકાલાગ્નિરદ્વિતીયો મહાયશાઃ ॥ ૮૩॥

સામપ્રિયઃ સામવેત્તા સામગઃ સામગપ્રિયઃ ।
ધીરોદાત્તો મહાધીરો ધૈર્યદો ધૈર્યવર્ધકઃ ॥ ૮૪॥

લાવણ્યરાશિઃ સર્વજ્ઞઃ સુબુદ્ધિર્બુદ્ધિમાન્વરઃ ।
તુમ્બવીણઃ કમ્બુકણ્ઠઃ શમ્બરારિનિકૃન્તનઃ ॥ ૮૫॥ (તુમ્બવીણા)

શાર્દૂલચર્મવસનઃ પૂર્ણાનન્દો જગત્પ્રિયઃ ।
જયપ્રદો જયાધ્યક્ષો જયાત્મા જયકારણઃ ॥ ૮૬॥ (જયપ્રિયો)

જઙ્ગમાજઙ્ગમાકારો જગદુત્પત્તિકારણઃ । (જઙ્ગમાકારી)
જગદ્રક્ષાકરો વશ્યો જગત્પ્રલયકારણઃ ॥ ૮૭॥

પૂષદન્તભિદુત્કૃષ્ટઃ પઞ્ચયજ્ઞપ્રભઞ્જકઃ ।
અષ્ટમૂર્તિર્વિશ્વમૂર્તિરતિમૂર્તિરમૂર્તિમાન્ ॥ ૮૮॥

કૈલાસશિખરાવાસઃ કૈલાસશિખરપ્રિયઃ ।
ભક્તકૈલાસદઃ સૂક્ષ્મો મર્મજ્ઞઃ સર્વશિક્ષકઃ ॥ ૮૯॥ (વર્મજ્ઞઃ)

સોમઃ સોમકલાકારો મહાતેજા મહાતપાઃ ।
હિરણ્યશ્મશ્રુરાનન્દઃ સ્વર્ણકેશઃ સુવર્ણદૃક્ ॥ ૯૦॥

બ્રહ્મા વિશ્વસૃગુર્વીશો મોચકો બન્ધવર્જિતઃ ।
સ્વતન્ત્રઃ સર્વમન્ત્રાત્મા દ્યુતિમાનમિતપ્રભઃ ॥ ૯૧॥

પુષ્કરાક્ષઃ પુણ્યકીર્તિઃ પુણ્યશ્રવણકીર્તનઃ ।
પુણ્યમૂર્તિઃ પુણ્યદાતા પુણ્યાપુણ્યફલપ્રદઃ ॥ ૯૨॥

સારભૂતઃ સ્વરમયો રસભૂતો રસાશ્રયઃ । (સારમયો)
ૐકારઃ પ્રણવો નાદો પ્રણતાર્તિપ્રભઞ્જનઃ ॥ ૯૩॥

નિકટસ્થોઽતિદૂરસ્થો વશી બ્રહ્માણ્ડનાયકઃ ।
મન્દારમૂલનિલયો મન્દારકુસુમાવૃતઃ ॥ ૯૪॥

વૃન્દારકપ્રિયતમો વૃન્દારકવરાર્ચિતઃ ।
શ્રીમાનનન્તકલ્યાણપરિપૂર્ણો મહોદયઃ ॥ ૯૫॥

મહોત્સાહો વિશ્વભોક્તા વિશ્વાશાપરિપૂરકઃ ।
સુલભોઽસુલભો લભ્યોઽલભ્યો લાભપ્રવર્ધકઃ ॥ ૯૬॥

લાભાત્મા લાભદો વક્તા દ્યુતિમાનનસૂયકઃ ।
બ્રહ્મચારી દૃઢાચારી દેવસિંહો ધનપ્રિયઃ ॥ ૯૭॥

વેદપો દેવદેવેશો દેવદેવોત્તમોત્તમઃ ।
બીજરાજો બીજહેતુર્બીજદો બીજવૃદ્ધિદઃ ॥ ૯૮॥

બીજાધારો બીજરૂપો નિર્બીજો બીજનાશકઃ । (બીજાધારી)
પરાપરેશો વરદઃ પિઙ્ગલોઽયુગ્મલોચનઃ ॥ ૯૯॥

પિઙ્ગલાક્ષઃ સુરગુરુઃ ગુરુઃ સુરગુરુપ્રિયઃ ।
યુગાવહો યુગાધીશો યુગકૃદ્યુગનાશકઃ ॥ ૧૦૦॥

કર્પૂરગૌરો ગૌરીશો ગૌરીગુરુગુહાશ્રયઃ ।
ધૂર્જટિઃ પિઙ્ગલજટો જટામણ્ડલમણ્ડિતઃ ॥ ૧૦૧॥

મનોજવો જીવહેતુરન્ધકાસુરસૂદનઃ ।
લોકબન્ધુઃ કલાધારઃ પાણ્ડુરઃ પ્રમથાધિપઃ ॥ ૧૦૨॥

અવ્યક્તલક્ષણો યોગી યોગીશો યોગપુઙ્ગવઃ ।)
શ્રિતાવાસો જનાવાસઃ સુરવાસઃ સુમણ્ડલઃ ॥ ૧૦૩॥ (સુરાવાસઃ)

ભવવૈદ્યો યોગિવૈદ્યો યોગિસિંહહૃદાસનઃ । (યોગસિદ્ધો હૃદાસનઃ
ઉત્તમોઽનુત્તમોઽશક્તઃ કાલકણ્ઠો વિષાદનઃ ॥ ૧૦૪॥

આશાસ્યઃ કમનીયાત્મા શુભઃ સુન્દરવિગ્રહઃ ।
ભક્તકલ્પતરુઃ સ્તોતા સ્તવ્યઃ સ્તોત્રવરપ્રિયઃ ॥ ૧૦૫॥

અપ્રમેયગુણાધારો વેદકૃદ્વેદવિગ્રહઃ ।
કીર્ત્યાધારઃ કીર્તિકરઃ કીર્તિહેતુરહેતુકઃ ॥ ૧૦૬॥

અપ્રધૃષ્યઃ શાન્તભદ્રઃ કીર્તિસ્તમ્ભો મનોમયઃ ।
ભૂશયોઽન્નમયોઽભોક્તા મહેષ્વાસો મહીતનુઃ ॥ ૧૦૭॥ (ભૂશયોઽન્નમયો ભોક્તા)

વિજ્ઞાનમય આનન્દમયઃ પ્રાણમયોઽન્નદઃ ।
સર્વલોકમયો યષ્ટા ધર્માધર્મપ્રવર્તકઃ ॥ ૧૦૮॥

અનિર્વિણ્ણો ગુણગ્રાહી સર્વધર્મફલપ્રદઃ । (સર્વધર્મપ્રવર્તકઃ)
દયાસુધાર્દ્રનયનો નિરાશીરપરિગ્રહઃ ॥ ૧૦૯॥

પરાર્થવૃત્તિર્મધુરો મધુરપ્રિયદર્શનઃ । (પરાર્થવૃદ્ધિર્મધુરો)
મુક્તાદામપરીતાઙ્ગો નિઃસઙ્ગો મઙ્ગલાકરઃ ॥ ૧૧૦॥

સુખપ્રદઃ સુખાકારઃ સુખદુઃખવિવર્જિતઃ ।
વિશૃઙ્ખલો જગત્કર્તા જિતસર્વઃ પિતામહઃ ॥ ૧૧૧॥

અનપાયોઽક્ષયો મુણ્ડી સુરૂપો રૂપવર્જિતઃ । (સુરુપ્યો)
અતીન્દ્રિયો મહામાયો માયાવી વિગતજ્વરઃ ॥ ૧૧૨॥

અમૃતઃ શાશ્વતઃ શાન્તો મૃત્યુહા મૂકનાશનઃ ।
મહાપ્રેતાસનાસીનઃ પિશાચાનુચરાવૃતઃ ॥ ૧૧૩॥

ગૌરીવિલાસસદનો નાનાગાનવિશારદઃ । (નાગાનનવિશારદઃ / નગરાજો વિશારદઃ)
વિચિત્રમાલ્યવસનો દિવ્યચન્દનચર્ચિતઃ ॥ ૧૧૪॥

વિષ્ણુબ્રહ્માદિવન્દ્યાઙ્ઘ્રિઃ સુરાસુરનમસ્કૃતઃ ।
કિરીટલેઢિફાલેન્દુર્મણિકઙ્કણભૂષિતઃ ॥ ૧૧૫॥ (ભાલેન્દુ)

રત્નાઙ્ગદાઙ્ગો રત્નેશો રત્નરઞ્જિતપાદુકઃ ।
નવરત્નગણોપેતકિરીટી રત્નકઞ્ચુકઃ ॥ ૧૧૬॥ (કિરીટો)

નાનાવિધાનેકરત્નલસત્કુણ્ડલમણ્ડિતઃ ।
દિવ્યરત્નગણાકીર્ણકણ્ઠાભરણભૂષિતઃ ॥ ૧૧૭॥

ગલવ્યાલમણિર્નાસાપુટભ્રાજિતમૌક્તિકઃ ।
રત્નાઙ્ગુલીયવિલસત્કરશાખાનખપ્રભઃ ॥ ૧૧૮॥

રત્નભ્રાજદ્ધેમસૂત્રલસત્કટિતટઃ પટુઃ ।
વામાઙ્કભાગવિલસત્પાર્વતીવીક્ષણપ્રિયઃ ॥ ૧૧૯॥

લીલાવલમ્બિતવપુર્ભક્તમાનસમન્દિરઃ ।

મન્દમન્દારપુષ્પૌઘલસદ્વાયુનિષેવિતઃ ॥ ૧૨૦॥

કસ્તૂરીવિલસત્ફાલો દિવ્યવેષવિરાજિતઃ । (ભાલો)
દિવ્યદેહપ્રભાકૂટસન્દીપિતદિગન્તરઃ ॥ ૧૨૧॥

દેવાસુરગુરુસ્તવ્યો દેવાસુરનમસ્કૃતઃ ।
હસ્તરાજત્પુણ્ડરીકઃ પુણ્ડરીકનિભેક્ષણઃ ॥ ૧૨૨॥

સર્વાશાસ્યગુણોઽમેયઃ સર્વલોકેષ્ટભૂષણઃ ।
સર્વેષ્ટદાતા સર્વેષ્ટઃ સ્ફુરન્મઙ્ગલવિગ્રહઃ ॥ ૧૨૩॥

અવિદ્યાલેશરહિતો નાનાવિદ્યૈકસંશ્રયઃ ।
મૂર્તિભવઃ કૃપાપૂરો ભક્તેષ્ટફલપૂરકઃ ॥ ૧૨૪॥ (મૂર્તિભવત્
સમ્પૂર્ણકામઃ સૌભાગ્યનિધિઃ સૌભાગ્યદાયકઃ ।
હિતૈષી હિતકૃત્સૌમ્યઃ પરાર્થૈકપ્રયોજનઃ ॥ ૧૨૫॥

શરણાગતદીનાર્તપરિત્રાણપરાયણઃ ।
જિષ્ણુર્નેતા વષટ્કારો ભ્રાજિષ્ણુર્ભોજનં હવિઃ ॥ ૧૨૬॥

ભોક્તા ભોજયિતા જેતા જિતારિર્જિતમાનસઃ ।
અક્ષરઃ કારણં ક્રુદ્ધસમરઃ શારદપ્લવઃ ॥ ૧૨૭॥

આજ્ઞાપકેચ્છો ગમ્ભીરઃ કવિર્દુઃસ્વપ્નનાશકઃ । (આજ્ઞાપરેપ્સો)
પઞ્ચબ્રહ્મસમુત્પત્તિઃ ક્ષેત્રજ્ઞઃ ક્ષેત્રપાલકઃ ॥ ૧૨૮॥

વ્યોમકેશો ભીમવેષો ગૌરીપતિરનામયઃ ।
ભવાબ્ધિતરણોપાયો ભગવાન્ ભક્તવત્સલઃ ॥ ૧૨૯॥

વરો વરિષ્ઠો નેદિષ્ઠઃ પ્રિયઃ પ્રિયદવઃ સુધીઃ ।
યન્તા યવિષ્ઠઃ ક્ષોદિષ્ઠો સ્થવિષ્ઠો યમશાસકઃ ॥ ૧૩૦॥ (ક્ષોદિષ્ઠો યવિષ્ઠો)

હિરણ્યગર્ભો હેમાઙ્ગો હેમરૂપો હિરણ્યદઃ ।
બ્રહ્મજ્યોતિરનાવેક્ષ્યશ્ચામુણ્ડાજનકો રવિઃ ॥ ૧૩૧॥ (બ્રહ્મજ્યોતિરતા
મોક્ષાર્થિજનસંસેવ્યો મોક્ષદો મોક્ષનાયકઃ । (મોક્ષાર્થી જનસંસેવ્યો)
મહાશ્મશાનનિલયો વેદાશ્વો ભૂરથઃ સ્થિરઃ ॥ ૧૩૨॥

મૃગવ્યાધો ચર્મધામા પ્રચ્છન્નઃ સ્ફટિકપ્રભઃ । (મૃગવ્યાઘ્રો)
સર્વજ્ઞઃ પરમાર્થાત્મા બ્રહ્માનન્દાશ્રયો વિભુઃ ॥ ૧૩૩॥

મહેશ્વરો મહાદેવઃ પરબ્રહ્મ સદાશિવઃ ॥ ૧૩૪॥

શ્રીપરબ્રહ્મ સદાશિવ ૐ નમ ઇતિ ।
ઉત્તર પીઠિકા (Assorted verses from shivarahasya)
એવમેતાનિ નામાનિ મુખ્યાનિ મમ ષણ્મુખ । (શઙ્કરી શાઙ્કરે)
શુભદાનિ વિચિત્રાણિ ગૌર્યૈ પ્રોક્તાનિ સાદરમ્ ॥ ૧॥

એતન્નામજપે યોગ્યઃ વિપ્રા દેવા મુનીશ્વરાઃ । (યોગ્યાઃ)
શુચિર્ભૂતાઃ શિવપરા નાન્યે રાગાદિમોહિતાઃ ॥ ૨॥ (શુચિભૂતાઃ)

વિભૂતિભૂષિતવપુઃ શુદ્ધો રુદ્રાક્ષભૂષણઃ ।
શિવલિઙ્ગસમીપસ્થો નિસ્સઙ્ગો નિર્જિતાસનઃ ॥ ૩॥

એકાગ્રચિત્તો નિયતો વશી ભૂતહિતે રતઃ ।
શિવલિઙ્ગાર્ચકો નિત્યં શિવૈકશરણઃ સદા ॥ ૪॥

મમ નામાનિ દિવ્યાનિ યો જપેદ્ભક્તિપૂર્વકમ્ ।
એવમુક્તગુણોપેતઃ સ દેવૈઃ પૂજિતો ભવેત્ ॥ ૫॥

સંસારપાશસંબદ્ધજનમોક્ષૈકસાધનમ્ ।
મન્નામસ્મરણં નૂનં તદેવ સકલાર્થદમ્ ॥ ૬॥

મન્નામૈવ પરં જપ્યમહમેવાક્ષયાર્થદઃ ।
અહમેવ સદા સેવ્યો ધ્યેયો મુક્ત્યર્થમાદરાત્ ॥ ૭॥

વિભૂતિવજ્રકવચૈર્મન્નામશરપાણિભિઃ । (મન્નામસ્મરણાર્થિભિઃ)
વિજયઃ સર્વતો લભ્યો ન તેષાં દૃશ્યતે ભયમ્ ॥ ૮॥ (શિવરહસ્ય ૭.૧.૧૮૮)

ન તેષાં દૃશ્યતે ભયમ્ ૐ નમ ઇતિ ।
શ્રીસૂત ઉવાચ-
ઇત્યુદીરિતમાકર્ણ્ય મહાદેવેન તદ્વચઃ ।
સન્તુષ્ટઃ ષણ્મુખઃ શમ્ભું તુષ્ટાવ ગિરિજાસુતઃ ॥ ૯॥ (શિવરહસ્ય ૭.૧.૨૦૩)

શ્રીસ્કન્દ ઉવાચ-
નમસ્તે નમસ્તે મહાદેવ શમ્ભો
નમસ્તે નમસ્તે પ્રપન્નૈકબન્ધો ।
નમસ્તે નમસ્તે દયાસારસિન્ધો
નમસ્તે નમસ્તે નમસ્તે મહેશ ॥ ૧૦॥ (શિવરહસ્ય ૭.૧.૨૨૨-૨૨૪)

નમસ્તે નમસ્તે મહામૃત્યુહારિન્
નમસ્તે નમસ્તે મહાદુઃખહારિન્ ।

નમસ્તે નમસ્તે મહાપાપહારિન્
નમસ્તે નમસ્તે નમસ્તે મહેશ ॥ ૧૧॥

નમસ્તે નમસ્તે સદા ચન્દ્રમૌલે
નમસ્તે નમસ્તે સદા શૂલપાણે ।
નમસ્તે નમસ્તે સદોમૈકજાને
નમસ્તે નમસ્તે નમસ્તે મહેશ ॥ ૧૨॥

વેદાન્તવેદ્યાય મહાદયાય
કૈલાસવાસાય શિવાધવાય ।
શિવસ્વરૂપાય સદાશિવાય
શિવાસમેતાય નમઃશિવાય ॥ ૧૩॥

ૐ નમઃશિવાય ઇતિ
શ્રીસૂત ઉવાચ-
ઇતિ સ્તુત્વા મહાદેવં સર્વવ્યાપિનમીશ્વરમ્ ।
પુનઃપ્રણમ્યાથ તતઃ સ્કન્દસ્તસ્થૌ કૃતાઞ્જલિઃ ॥ ૧૪॥ (શિવરહસ્ય ૭.૧.૨૩૫)

ભવન્તોऽપિ મુનિશ્રેષ્ઠાઃ સામ્બધ્યાનપરાયણાઃ ।
શિવનામજપં કૃત્વા તિષ્ઠન્તુ સુખિનઃ સદા ॥ ૧૫॥ (શિવરહસ્ય ૭.૧.૨૪૮-૨૫૦)

શિવ એવ સદા ધ્યેયઃ સર્વદેવોત્તમઃ પ્રભુઃ ।
શિવ એવ સદા પૂજ્યો મુક્તિકામૈર્ન સંશયઃ ॥ ૧૬॥

મહેશાન્નાધિકો દેવઃ સ એવ સુરસત્તમઃ ।
સ એવ સર્વવેદાન્તવેદ્યો નાત્રાસ્તિ સંશયઃ ॥ ૧૭॥

જન્માન્તરસહસ્રેષુ યદિ તપ્તં તપસ્તદા ।
તસ્ય શ્રદ્ધા મહાદેવે ભક્તિશ્ચ ભવતિ ધ્રુવમ્ ॥ ૧૮॥ (શિવરહસ્ય ૭.૧.૨૫૨)

સુભગા જનની તસ્ય તસ્યૈવ કુલમુન્નતમ્ ।
તસ્યૈવ જન્મ સફલં યસ્ય ભક્તિઃ સદાશિવે ॥ ૧૯॥ (શિવરહસ્ય ૭.૧.૨૫૪)

યે શમ્ભું સુરસત્તમં સુરગણૈરારાધ્યમીશં શિવં
શૈલાધીશસુતાસમેતમમલં સમ્પૂજયન્ત્યાદરાત્ ।
તે ધન્યાઃ શિવપાદપૂજનપરાઃ હ્યન્યો ન ધન્યો જનઃ
સત્યં સત્યમિહોચ્યતે મુનિવરાઃ સત્યં પુનઃ સર્વથા ॥ ૨૦॥ (શિવરહસ્ય ૭.૧.૨૫૫)

સત્યં પુનઃ સર્વથા ૐ નમ ઇતિ ।

નમઃ શિવાય સામ્બાય સગણાય સસૂનવે ।
પ્રધાનપુરુષેશાય સર્ગસ્થિત્યન્તહેતવે ॥ ૨૧॥

નમસ્તે ગિરિજાનાથ ભક્તાનામિષ્ટદાયક ।
દેહિ ભક્તિં ત્વયીશાન સર્વાભીષ્ટં ચ દેહિ મે ॥ ૨૨॥

સામ્બ શમ્ભો મહાદેવ દયાસાગર શઙ્કર ।
મચ્ચિત્તભ્રમરો નિત્યં તવાસ્તુ પદપઙ્કજે ॥ ૨૩॥

સર્વાર્થ શર્વ સર્વેશ સર્વોત્તમ મહેશ્વર ।
તવ નામામૃતં દિવ્યં જિહ્વાગ્રે મમ તિષ્ઠતુ ॥ ૨૪॥

યદક્ષરં પદં ભ્રષ્ટં માત્રાહીનં ચ યદ્ ભવેત્ ।
તત્સર્વં ક્ષમ્યતાં દેવ પ્રસીદ પરમેશ્વર ॥ ૨૫॥

કરચરણકૃતં વાક્કાયજં કર્મજં વા
શ્રવણનયનજં વા માનસં વાપરાધમ્ ।
વિહિતમવિહિતં વા સર્વમેતત્ ક્ષમસ્વ
જયજય કરુણાબ્ધે શ્રીમહાદેવ શમ્ભો ॥ ૨૬॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
બુદ્ધ્યાઽઽત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્ સકલં પરસ્મૈ
સદાશિવાયેતિ સમર્પયામિ ॥ ૨૭॥

॥ ૐ તત્સત્ ઇતિ શ્રીમુખ્યશિવસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

The sahasranAma verses (1-134) are also found in shivarahasya saptamAMsha adhyAya 1 with some differences. The variations are given on the right side of each line it occurs. There are some selected verses from shivarahasya Adhyaya 1 in the uttara pIThikA as well.

Proofread by KS Ramachandran, Avinash Sathaye, Sivakumar Thyagarajan, DPD

*ShrI ShivasahasranAma Stotram*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*